भ्रटादेशः अस्त्यर्थे अच् । अवनतनासिके (खांदा) ।

**अवम** त्रि० अव+अमच् । १रक्षके २पितृगणभेदे पु० "अवमैस्त ऊर्व्वैः काव्यैस्ते पितृभिर्भक्षितस्य मधुमतोनाराशंसस्य" ता०ब्रा० "त्रिविधाः पितरः अवमाः ऊर्व्वाः काव्याश्चेति अनुसवनं नाराशंसदेवताः । हे सोम ! अवमैः रक्षकैः एतत्संज्ञकैः पितृभिः" भा० । अपादानेऽमच् । ३पापे ४तद्वति ५कुत्सिते च त्रि० । अवोभवः अवस्ताद्भवः "अवोऽधसोर्लोपश्चेति" मः अन्त्यलोपः । ६अधमे त्रि० "अनलकानलकानमवमां पुरीम्" रघुः । "या त ऊतिरवमा या परमा" ऋ० ६,२५,१,"उतावमस्य पुरुहूत बोधि" ऋ० ६, २१,५ "प्रकृतानां सावनानाञ्चान्द्राणाञ्चान्तरमवमानीच्यते सावनदिनेभ्यश्चान्द्राहा यावद्भिरधिकास्ते दिनक्षयाहा" इति च प्रमिताक्षरोक्ते ७दिनक्षये न० । तदानयनप्रकारश्च सि०शि० "शशाङ्कमासोनितसावनेन ०,२८,१० त्रिंशद्धृताः लब्धदिनैस्तु चान्द्रैः । रुद्रांशकोनाब्धिरसैः ६२,५४,२२ क्षयाहः, स्यात् सावनोऽतश्च युगेऽनुपातात्" । युगे चान्द्राणां सावनानां च यदन्तरं तान्यवमानि । तत्र एकस्मिन् मासे चान्द्रसावनान्तरं कुदिनात्मकं गृहीतम् । तत्र दिवसः शून्यम् अष्टाविंशतिर्घटिकाः दश पानीयपलानि ०,२८,१० इदमेकस्मिन् चान्द्रमासे त्रिंशत्तिथ्यात्मके कुदिनात्मकमवमखण्डम् । यद्यनेन ०,२८,१०, त्रिंशद्दिनानि चान्द्राणि लभ्यन्ते तदा संपूर्णैनैकेनावमेन कियन्तीति त्रैराशिकेन लब्धैः रुद्रांशकोनाब्धिरसैः ६२,५४,२२ एकः क्षयाहो भवति स च सावनः एवं कल्पेऽपि अनुपातात् । "सावनान्यवमानि स्युश्चान्द्रेभ्यः साधितानि चेत् । सावनेभ्यस्तु चान्द्राणि तच्छेषं तद्वशात्तथा" इति सि०शि० । कल्पेऽवमप्रमाणञ्च दर्शितं तत्रैव । "दिनक्षयास्तत्र सहस्रनिघ्नाः खबाणबाणाश्वयमाङ्गिखेषुदस्राः" २५०८२५५०००० । अन्तरं तरणिचन्द्रचक्रजं यद्भवेत् स विधुमाससंचयः । चन्द्रचक्रदिवसैक्यमूनितं चन्द्रमासभदिनैर्दिनक्षयाः" "अथ चन्द्रचक्रदिनैक्ये चन्द्रमासभदिनैक्येन वर्ज्जिते क्षयाहाः स्युः । अत्र वासना । चन्द्रभगणा रविभगणैरूनाश्चान्द्रमासाः स्युः अतो विपर्य्ययाच्चान्द्रमासोनाश्चन्द्रभगणा रविभगणा भवन्ति तैरूना भभ्रमाः सावना दिवसा भवन्ति । चान्द्राहाः क्षयाहा भवन्ति" प्रमिता० । "तिथ्यन्तद्वयमेको दिनवारः स्पृशति यत्र तद्भवत्यवदिनम्" ज्योति० त०

**अवमत** त्रि० अव+मन–क्त । १अवज्ञाते २तिरस्कृते च ।

**अवमताङ्कुश** पु० अवमतोऽङ्कुशस्तत्ताघातो येन । दुर्दान्ते गजे ।

**अवमति** स्त्री अव–मन भावे क्तिन् । १अवज्ञायाम् २अनादरे २तिरस्कारे च । [वमा तिथिः" ज्योतिषोक्ते दिनक्षये ।

**अवमतिथि** स्त्री कर्म्म० । "स्पृशेत्तिस्रस्तिथयो वारे एकस्मिन्न

**अवमदिन** न० कर्म्म० । "तिथ्यन्तद्वयमेकोदिनवारो यत्र तद्भवत्यमवदिनम्" ज्योतिषोक्ते दिनक्षये ।

**अवमन्तव्य** त्रि० अव+मन–तव्य । १अवज्ञेये २अनादरणीये– "बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः" मनुः ।

**अवमन्तृ** त्रि० अव+मन–तृच् स्त्रियां ङीप् । १अवज्ञातरि २तिरस्कर्त्तरि च ।

**अवमन्थ** पु० अवमथ्नाति अव+मन्थ–अच् । सुश्रुतोक्ते पालीस्थे उपद्रवरूपे १रोगभेदे "अतऊर्द्ध्वं नामलिङ्गे वक्ष्ये पाल्यास्तूपद्रवान् । उत्पाटकश्चोत्पुटकः श्यावः कण्डुयुतो भृशम् । अवमन्थः सकण्डूको ग्रन्थिको जम्बुलस्तथेति" । "प्रलेपनमिदं दद्यादवसिच्या वमन्थके" सुश्रु० । तत्रोक्ते शूकदोषनिमित्ते २व्याधिभेदे च यथा "लिङ्गवृद्धिमिच्छतामक्रमप्रवृत्तानां शूकदोषनिमित्ता दश चाष्टौ च व्याधयो जायन्ते तद्यथा सर्पिका अष्ठीलिका ग्रथितं कुम्भीका अलजी मृदितं सम्मूढपिडका अवमन्थ" इत्युपक्रम्य । "दीर्घा बह्व्यश्च पिडका दीर्य्यन्ते मध्यतस्तु याः । सोऽवमन्थः कफासृग्भ्यां वेदनारोमहर्षकृत्" तत्रैव लक्षितः । "अवमन्थे गते पाकं भिन्ने तैलं विधीयते" सुश्रु० । ३अवमन्थनकारके त्रि०

**अवमर्द्द** पु० अव+मृद–घञ् । ४पीडने । "स च त्वमासाद्य रणावमर्द्दम्" रामा० २राज्याङ्गभेदे "अवमर्द्दः प्रतीघातस्तथा चैव बलीयसाम्" इति भा० शा० राजधर्मे ।

**अवमर्ष** पु० अव+मृष–घञ् । १आलोचनायाम्, "मुखं प्रतिमुखं गर्भोऽवमर्ष उपसंहृतिः । इति पञ्चास्य भेदाः स्युः" इत्युपक्रम्य "यत्र मुख्यफलोपाय उद्भिन्नो गर्भतोऽधिकः । शापाद्यैः सान्तरायश्च सोऽवमर्ष" इति स्मृतः सा०द० लक्षिते २नाटकस्य सन्ध्यंशभेदे च । विमर्ष इति पाठान्तरम् ।

**अवमान** पु० अव+मन–भावे घञ् । १अवज्ञायाम् २अनादरे च "अमृतस्येव चाकाङ्क्षेदवमानस्य सर्व्वदा" मनुः ।

**अवमानना** स्त्री अव+चुरा०-मन–युच् । अपमानकरणे "तत्त्वज्ञानापदीर्षादेर्निर्वेदः स्वावमानना" सा०द० । भावे ल्युट् । अवमाननं तत्रैव न० निर्वेदः स्वावमाननम्" हेमच० ।

**अवमानित** त्रि० अव+चुरा० मन–क्त । १कृतापमाने २कृतानादरे च विप्रलब्धा तु सा ज्ञेया नितान्तमवमानिता" सा०द० ।